.. mahAmAyAShTakam ..

# ॥ महामायाष्टकम् ॥

॥ (पैङ्गनाडु) गणपतिशास्त्रिकृतम् ॥

सत्स्वन्येष्वपि दैवतेषु बहुषु प्रायो जना भूतले
यामेकां जननीति सन्ततममी जल्पन्ति तादृग्विधा ।
भक्तस्तोमभयप्रणाशनचणा भव्याय दीव्यत्वसौ
देवी स्फोटविपाटनैकचतुरा माता महामायिका ॥ १ ॥

मातेत्याह्वय एव जल्पति महद् वात्सल्यमस्मासु ते
कारुण्ये तव शीतलेति यदिदं नामैव साक्षीयते ।
इत्थं वत्सलतादयानिधिरिति ख्याता त्वमस्मानिमान्
मातः कातरतां निर्वाय नितरामानन्दितानातनु ॥ २ ॥

प्रत्यक्षेतरवैभवैः किमितरैर्देवव्रजैस्तादृशैः
निन्दायामपि च स्तुतावपि फलं किंचिन्न ये तन्वते ।
या निन्दास्तवयोः फलं भगवती दत्सेऽनुरूपं क्षणान्
नूनं तादृशवैभवा विजयसे देवि त्वमेका भुवि ॥ ३ ॥

वृत्तान्तं विविधप्रकारमयि ते जल्पन्ति लोके जनाः
तत्त्वं नोपलभे तथैव न विधिं जाने त्वदाराधने ।
तस्मादम्ब कथं पुनः कलयितुं शक्तास्मि ते पूजनं
नूनं वच्मि दयानिधेऽवतु जडानस्मान् भवत्यादरात् ॥ ४ ॥

रोदंरोदमुदीर्णबाष्पलहरीक्लिन्नाननेे ते शिशा-
वस्मिन् तप्यति किंचिदत्र करुणादृष्टिं विधत्से न चेत् ।
पातुं स्फोटगदात् पटुत्वमिव ते कस्यास्ति मातर्वद
क्कायं गच्छतु कस्य पश्यतु मुखं का वा गतिर्लभ्यताम् ॥ ५ ॥

धर्म्यानुच्चरतां पथः कलयतां दोषांस्तथा चात्मनः
स्वैरं निन्दनमातनोतु सततं द्वेष्येऽपथे तिष्ठतु ।
एतावत्यपि वत्सके किल शुचं याते मनाक् तत्क्षणं
तत्त्राणे जननी प्रयास्यति हि तन्मातस्त्वमस्मानव ॥ ६ ॥

आबालस्थविरं प्रसिद्धमयि ते मातेति यन्नाम तद्
गोप्तुं नैव हि शक्यमम्ब तदसौ तादृग्विधा त्वं यदि ।
अस्मिन् खिद्यति वत्सके न तनुषे मातुर्गुणं चेत्तदा
नूनं स्यादपवादपात्रमयि तन्मातस्त्वमस्मानव ॥ ७ ॥

मुक्ताहारमनोहरद्युतियुतां मूर्तिं नरास्तावकीं
ये ध्यायन्ति मृणालतन्तुसदृशीं नाभीहृदोरन्तरे ।
ते घोरज्वरभारजातविषमस्फोटस्फुटद्दुःसह-
क्लेदोद्यत्कटुपूतिगन्धमयि नो जानन्त्यमी जात्वपि ॥ ८ ॥

कारुण्याम्बुधिशीतलापदपयोजातद्वयीभावना-
जातस्फीतहृदम्बुजामितसुधानिर्यासरूपामिमाम् ।
ये मर्त्या स्तुतिमादराद् गणपतेर्वक्त्राम्बुजान्निःसृतां
विश्वासेन पठन्ति ते न दधते स्फोटव्यथां जातुचित् ॥ ९ ॥

इति श्रीमहामायाष्टकं संपूर्णम्

---

From: Sridhar Seshagiri seshagir@egr.msu.edu

---

Please send corrections to sanskrit@cheerful.com
Last updated February 2, 2002